# dramiDopaniShatsAraH

# દ્રમિડોપનિષત્સારઃ

## Document Information

Text title : dramiDopaniShatsAraH

File name : dramiDopaniShatsAra.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Vedantacharya

Proofread by : Sunder Hattangadi

Latest update : April 4, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 2, 2021

*sanskritdocuments.org*

# દ્રમિડોપનિષત્સારઃ

શ્રીઃ ।
શ્રી વેદાન્તાચાર્યૈઃ અનુગૃહીતઃ
દ્રમિડોપનિષત્સારઃ
શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

સેવાયોગ્યોઽતિભોગ્યઃ શુભસુભગતનુઃ સર્વભોગ્યાતિશાયી
શ્રેયસ્તદ્ધેતુદાતા પ્રપદનસુલભોઽનિષ્ટવિધ્વંસશીલઃ ।
ભક્તચ્છન્દાનવર્તી નિરુપધિકસુહૃત્ સત્પદવ્યાં સહાયઃ
શ્રીમાન્ સર્વોચિતાયામુપનિષદિ મિષત્યેષ ગાથાશતૈર્નઃ ॥ ૧॥

આદ્યે પશ્યન્નુપાયં પ્રભુમિહ પરમપ્રાપ્યભૂતં દ્વિતીયે
કલ્યાણોદારમૂર્તેર્દ્વિતયમિદમિતિ પ્રેક્ષમાણસ્તૃતીયે ।
ઐશ્વર્યાદેશ્ચતુર્થે વિષમધુતુલયાઽનન્યભોગ્યત્વમિચ્છન્
ષડ્ભિઃ સ્વાં પઞ્ચમાદ્યૈરનિતરગતિતતામાચચક્ષે મુનીન્દ્રઃ ॥ ૨॥

પરં નિર્વૈષમ્યં સુલભમપરાધપ્રસહનં
સુશીલં સ્વારાધં સરસભજનં સ્વાર્જવગુણમ્ ।
સુસાત્મ્યસ્વાનન્દપ્રદમનઘવિશ્રાણનપરં
મુકુન્દં નિધ્યાયન્ મુનિરધિજગાવાદ્યશતકે ॥ ૩॥

દ્વિકાભ્યાં દ્વ્યષ્ટાઙ્ઘ્રિર્દુરધિગમનીતિસ્થપુટિતા
યદન્ત્યા મીમાંસા શ્રુતિશિખરતત્ત્વં વ્યવૃણુત ।
તદાદૌ ગાથાભિર્મુનિરધિકવિંશાભિભિરિહ નઃ
કૃતી સારગ્રાહં વ્યતરદિહ સંગૃહ્ય કૃપયા ॥ ૪॥

પરત્વાદ્યૈરિત્થં પરિચરણસક્તો ગુણગણૈઃ
પ્રભું સેવાયોગ્યં પ્રથમશતકે વીક્ષ્ય વરદમ્ ।
તમેવ સ્વાત્યર્થપ્રિયમથ ચ ભોક્તું વ્યવસિતૌ

વરેષ્કવં તસ્ય પ્રથમવરણીયં પ્રથયતિ ॥ ૫॥

છિતીયેઽતિક્લેશક્ષણવિરહમુત્તુઙ્ગલલિત
ભિલત્સર્વાઙ્ગપાદં વ્યસનશમનં સ્વાપ્તિમુદિતમ્ ।
સ્વવૈમુખ્યત્રસ્તં સ્વજનસુહૃદં મુક્તિરસદં
સ્વકૈકૃનર્યોદ્દિશ્યં સુભગસવિધસ્થં નિરનિશત્ ॥ ૬॥

ઉપાયત્વૈકાન્તં પ્રથમમિહ સેવ્યત્વમુદિતં
તતશ્ચ પ્રાપ્યત્વૌપયિકમતિભોગ્યત્વમવદત્ ।
દ્વયં તત્સ્વાસાધારણતનુવિશિત્રસ્ય ગણયન્
તૃતીયે વિશ્વેશં શુભસુભગરૂપં કથયતિ ॥ ૭॥

અનીદૃક્યૌન્દર્યં તનુવિહિતસર્શાદિસુભં
સ્વસેવાર્થાકારં પ્રગુણવપુષં મોહનતનુમ્ ।
અપશ્યલ્લભ્યાર્ચાવિભવમતિદાસ્યાવલ્કં
સદા દૃશ્યં સ્તુત્યાકૃ।તેઅધવિરુદ્ધાકૃતિશિહ ॥ ૮॥

શ્રિયા કાન્તોઽનન્તઃ શુમલનુવિશિષ્ટઃ ફલમસૌ
ફલાવાપ્તહેતુઃ સ્વયપ્રિતિ ચ નિર્ધાર્ય શતકૈઃ ।
ઇદાનીં ઘુદ્ધિસ્થક્રમત ઇહ યુક્દ્ર્યા મુનિવરઃ
ફલત્વં તસ્યૈવ દ્રઢયતિ તદન્યેષુ વિમુખઃ ॥ ૯॥

સ્તિયૈકુવયં તુર્યે રજ્ઞહજવહભોભ્ય નિરવિશત્
મિથસ્શ્વિઞ્છં ક્લેશાવહસહિનુતુવ્ય નિજજનમ્ ।
કૃતાર્થીકુર્વન્તં પ્રણયિભિષજં સદ્ધદકગુણ
ખ્યહેયસ્વોપેક્ષ્ય સ્વમતફલમુઞ્ચૈસ્યવવગતમ્ ॥ ૧૦॥

ઉપાયત્વં યત્તત્ પ્રથમશતકેઽભાવ્યત વિભોઃ
અનન્યોપાયસ્તત્ દ્રઢયતિ પરં પઞ્ચમનુખૈઃ ।
નિરીહસ્તત્રાદૌ નિરચધિકનિર્હેતુકદયા-
સરિરસ્રોતઃ પદ્મં શરણયતિ નાયદન્ય ચરણમ્ ॥ ૧૧॥

દયાનિઘ્ન ભક્તૈરઘવિમથનં પ્રેમજનકં
જગદ્રક્ષાદીક્ષં સ્મૃતિસુપ્રમહમ્ભાવવિશ્વમ્ ।
શરણ્યં દીનાનાં સ્વરરવકૃતદાસ્યાભ્યુપગમં
પ્રચખ્યૌ તં પ્રાપ્તં પ્રશકનકૃતં પઞ્ચમશને ॥ ૧૨॥

અન્નાધન્તાનન્દસ્વરસકરુણાકન્દજલિતઃ
પ્રણેતુર્વ્યાપારઃ પ્રપદનવિપાકાર્હ ઉદિતઃ ।
તમાચાર્યોપક્ષં ચિરવિરશ્મિખ્યાત્મઘટન-
સ્ફુરચ્છક્તિં ષષ્ઠે મુનિરશરણો યાતિ શરણમ્ ॥ ૧૩॥

ગુરુદ્વારોપેયં સ્વયમભિમતં વૌરેઘટકં
ચરિત્રૈઃ કર્ષન્તં પરવિઘટનં સ્વાન્વિતહરમ્ ।
નિદાનં ધૃત્યાદેર્ઘટકવશભૂતિદ્વયમગાત્
અનર્હદ્વૈઘટથં ત્વવિકલશરણ્યસ્થિતિમિહ ॥ ૧૪॥

તદેવં ષષ્ઠાન્તં વિક્તિસવિશેઅગ્રપહાનઃ
મ્લાલાભાત્ ખિન્નસ્ત્વરિતહૃદયઃ સપ્તમશતે ।
અનિષ્ટોપન્યાસપ્રભૃતિભિરનિષ્ટપ્રશમને
સ્વતઃસિધ્યચ્છલિ પ્રભુમભિમુખં સંમુખયતિ ॥ ૧૫॥

સહન્ શાટ્યાશઙ્કાં ઉપશમિતગર્હઃ પ્રકટયન્
સ્વગોવૃણત્વં ગુપ્તિક્રમમખિલજન્તુપ્રણયિતામ્ ।
શ્રિતાક્રન્દચ્છેત્તા સ્મરણવિશદશ્ચિત્રવિભવઃ
સ્તુતૌ યુઞ્જન્ સ્તોતૃમુયસનજિદદર્શિ પ્રભુવરઃ ॥ ૧૬॥

અથાનિષ્ટાન્ ખ્યા સ્વયમુપજિહીર્ષન્નપિ વિભુઃ
તદિચ્છાં બાહ્યેષુ પ્રશમયિતુકામઃ ક્રમવશાત્ ।
નિજેચ્છાર્સંસિદ્ધત્રિવિધચિદચિક્કતવિતતિઃ
શ્રિતેચ્છાવૈચિત્રીવશા ઇતિ વદત્યક્ષ્મશતે ॥ ૧૭॥

દિદૃક્ષાયાં દૃશ્યઃ પ્રભુરગણિ નિસ્સઙ્ગસુલભઃ
સ્વાષ્ટશ્લેષે કાન્તઃ શ્રિતવિહિતપૌષ્કલ્યવિભવઃ ।
અપેક્ષાસાપેક્ષઃ સ્વવિતરણસજ્જો હૃદિ રતઃ
સ્વદાસ્યં તન્નિષ્ઠા તદવધિમપીહ પ્રકટયન્ ॥ ૧૮॥

અભીષ્ટં વિશ્વસ્મિન્ વિષમફલકાઙ્ખિણ્યવિષમં
પ્રયચ્છન્તં દૃષ્ટ્વા પરમપુરુષાયૈકરસિકઃ ।
નિરસ્તાન્યાપેક્ષો નિખિલજગદીશસ્ય નવમે
નિદાનં સિદ્ધીનાં નિરુપધિકસુહૃત્ત્વં ગણયતિ ॥ ૧૯॥

અભાવ્યેકો બન્ધુશ્ચિરકૃતદયઃ શીલજલધિઃ
સ્વસબન્ધાત્ ગોપ્તા સ્વગુણગરિમસ્મારણપરઃ ।

અશક્યો વિસ્મર્તું ઘટકમુખીવસ્નભવિષયઃ
સુમજ્જનિઃ સિદ્ધ્યનુછસમય ઇચ્છન્નવસરમ્ ॥ ૨૦॥

ઉદન્તૈરિત્યેવં નિરુપધિકસૌહાર્દપિશુનૈઃ
ઉદન્યામુસ્તોમુપજનિતવન્તં નિજપદે ।
વિવર્ગાભિક્રાન્તસ્થિરજગરઘશવપથગતેઃ
સહાયીકુર્વાણશ્ચરમશતકે વિન્દનિ મુનિઃ ॥ ૨૧॥

ગતિં વ્યધ્વક્લેશચ્છિદમપદશઙ્કાસ્પદરસં
ભજદ્ભિઃ સુપ્રાપં વિવિધભજનપ્રમ્લિમિહ ।
ફલે તીવ્રોદ્યોગં સ્વવિક્ર્યકૃતાત્યાદરમગાત્
યદૃચ્છાતુષ્ટે સત્સરાશામપુનર્જન્મસયુજમ્ ॥ ૨૨॥

પરં પ્રાપ્યં પશ્યન્ પરિચરણહેતું વિગણયન્
પરિષ્કુર્વન્નાજ્ઞામનિતરશરણ્યઃ શરણયન્ ।
અનિષ્ટપ્રધ્વંસપ્રભૃતિષુ નિદાનં ચ કથયન્
મુહુર્દેવં લક્ષ્મ્યા સહિતમિહ ભેજે મુનિવરઃ ॥ ૨૩॥

પુરા શોકઃ શ્લોકોઽભવદિતિ નયાદિત્યપનિપ-
ન્મુનેઃ પુણ્યશ્લોકાદજનિ પરભક્તેઃ પરિણતિઃ ।
વ્યપોહ્ય સ્વં ભાવં હરિચરણસન્તાનકલિકામ્
અવિક્ષદ્યોગી યસ્તનુમતનુકારુણ્યવિવશઃ ॥ ૨૪॥

સતામિત્થં સારં દ્રમિડનિગમસ્યાન્વકથયત્
બહૂનાં વિદ્યાનાં બહુભતિપદ વેઙ્કટપતિઃ ।
દિશાસૌધશ્રેણીદૃઢઘટિતજૈત્રધ્વજપટી-
પરામર્શભ્રશ્યદ્વ્યતિમતનિરાબાધનિગમઃ ॥ ૨૫॥

મનુપ્રાસપ્રાચેતધૃવપરિષદર્હા ક્વચિદિયં
સુભવાસિક્તા સૂક્તિઃ સ્વયમુદયમન્વિચ્છતિ જને ।
નિરુવ્યડયુઃ કે વિન્ધ્યાચલવિકટસન્ધ્યાનટજ્ઝા-
પરિભ્રાન્તા પઙ્ગોરુપરિ યદિ ગઙ્ગા નિપતતિ ॥ ૨૬॥

ઇતિ

શ્રીકવિતાર્કિકસિંહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય
શ્રીમદ્વેઙ્કટનાથસ્ય શ્રીમદ્વેદાન્તાચાર્યસ્ય કૃતિષુ

દ્રમિડોપનિષત્સારઃ સમાપ્તઃ ।

Proofread by Sunder Hattangadi sunedrh@hotmail.com

*dramiDopaniShatsAraH*

pdf was typeset on December 2, 2021

Please send corrections to *sanskrit@cheerful.com*